# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 1st Semester Examination, 2022-23

## SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) जगतः पितरौ कथं सम्पृक्तौ भवतः ?

(ख) हेम्नः शुद्धिः श्यामिका वा केन परीक्ष्यते ?

(ग) इक्ष्वाकुः कः आसीत् ?

(घ) किमर्थं दिलीपः प्रजाभ्यः करमग्रहीत् ?

(ङ) कविः रघुवंशस्य वर्णनं कथं मन्यते ?

(च) दिलीपस्य कार्यानुष्ठानं कीदृशमासीत् ?

(छ) दिलीपस्य अर्थकामौ कीदृशौ आस्ताम् ?

2. कस्यचिदेकस्य श्लोकस्य व्याख्या कार्या। 5×1 = 5

(क) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।

प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

(ख) जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।

अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5×1 = 5

जगतः पितरौ, प्रणवश्छन्दः, वृद्धत्वं जरसा विना।

## SECTION-B

3. 'वदन्त्यपर्णेति च तां पुराविदः'– तस्या अपर्णेति नाम कथमभूत् ? पाठ्यांशमनुसृत्य तस्याः कठोरातपस्या वर्णनीया। 10

अथवा

कुमारसम्भवमिति महाकाव्यस्य पञ्चमसर्गमनुसृत्य 'उपमा कालिदासस्य' इति सूक्तिः आलोच्यताम्।

4. अधोलिखितेषु श्लोकद्वयं व्याख्येयम्। 5×2 = 10

(क) तथा समक्षं दहता मनोभवं पिनाकिना भग्नोमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

(ख) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

(ग) यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवालासङ्गमपि प्रकाशते॥

## SECTION-C

5. नीतिशतकम् इति ग्रन्थस्य मङ्गलाचरणमधिकृत्य विस्तरेण व्याख्यायताम्। 10

अथवा

नीतिशतकम् इति ग्रन्थस्य रचयिता कः ? नीतिशतकमवलम्ब्य विद्याप्रशंसा स्वभाषया आलोच्यताम्। 10

6. अधोलिखितेषु कस्यचिदेकस्य श्लोकस्य सप्रसङ्गं व्याख्या कार्या । 5×1 = 5

(क) स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्॥

(ख) येषां न विद्या न तपः न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5

अल्पज्ञः, ज्ञानलवदुर्विदग्धम्।

——×——